# चम्पूरामायणदिशा गङ्गावतरणमाहात्म्यप्रपञ्चनम्

**डॉ. व्ही. बालाजी**

---

**उपोद्घातः** –

असारेऽस्मिन् संसारे दुःखदावाग्निदग्धस्य आधिव्याधिप्रपीडितस्य पापादिविषण्णस्य मायामोहभ्रान्तचेतसो मानववृन्दस्य मनःसन्तापनिवारणाय चेतःप्रसादाय सुखावाप्तये च विद्वद्धौरेयाः तत्वज्ञाः काव्यशास्त्रनामकं रत्नं वाङ्मयमहोदधेः सारभूतम् उददीधरन् । तदुक्तं महर्षिप्रवरेण कपिलमुनिना –

**भावानुभूतिमद्वाक्यं रसवत् ध्वनिसङ्गतम् ।**
**गुणालङ्कारसञ्जुष्टं काव्यं रम्यार्थद्योतकम् ।।**[1]

इति । एवं तथाभूतस्य काव्यस्य सर्वप्रथमं लक्षणमित्थमुक्तम् अग्निपुराणे –

**संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली ।**
**काव्यं स्फुरदलंकारं गुणवद् दोषवर्जितम् ।।**[2]

इति । एवं शब्दार्थशरीरं काव्यमिति सर्वसम्मतलक्षणमप्यस्ति साहित्यवाङ्मये । तथाभूतस्य काव्यस्य विशेषलक्षणं मम्मटाचार्यैः स्वीय काव्यप्रकाशे इत्थं सन्निगद्यते –"तददोषौ सगुणौ शब्दार्थावनलङ्कृती पुनः क्वापि"[3]इति । तथाभूतस्य सहृदयमनःप्रीतिदायकस्य काव्यस्य उत्तम-अधम भेदेन विभागः कृतः । यस्मिन् काव्ये व्यङ्यार्थः वाच्यात् प्राधान्यं लभते तत्काव्यं -मध्यम ,तदेवोत्तमकाव्यमिति विदुषां मनीषा । यत्र च व्यङ्ग्यस्यास्तित्वेपि तस्याप्राधान्यं ,ध्वनिकाव्यं गुणीभूतमिति। यत्र व्यङ्ग्यासमप्रधानञ्च वर्तते तत्तु मध्यमाख्यंर्थ एव नास्ति तदधममिति ध्वनिकारानुयायिभिः आलङ्कारैः विशेषविभागः कृतः ।

अपि च काव्यस्य सामान्यतया दृश्यं श्रव्यमिति द्विप्रकारतया विभागः कृतः । तत्र श्रव्यकाव्यं त्रेधा संविभक्तं वर्तते गद्यं-पद्यं-चम्पूः इति । तेषां लक्षणं क्रमेणाह - **"अपादः पदसंघातः गद्यम्", "पद्यं चतुष्पदम्", "गद्यपद्यमयी काचित् चम्पूरित्यभिधीयते"** इति ।

तेषु चम्पूविभागेषु बहूनि काव्यानि संविलसन्ति। तेषु भोजराजविरचितं श्रीरामचन्द्रचरितप्रकटनपरं चम्पूरामायणमिति एकं महाकाव्यं चकास्ति।

**गङ्गादेव्याः माहात्म्यम् -**

तत्र बालकाण्डे गाधिसूनुना रामलक्ष्मणावुद्दिश्य गङ्गादेव्याः माहात्यम्यमधिकृत्य इत्थमुररीक्रियते –

**आजानपावनक्षीरां वृषानन्दविधायिनीम्।**
**श्रुतिप्रणयिनीं सोऽयमापगामाप गामिव ।।**[4]

सोऽयं श्रीरामः **आजानपावनक्षीरां** – आजानपावनं स्वभावशुद्धं क्षीरं यस्यास्ताम् **आजानपावनक्षीरां** गङ्गामाप इत्यर्थः । **'शुद्धं भागीरथीजलं'** इति वचनानुरोधेन स्वजन्मनः प्रभृति पावनभूतां नाकलोकतरङ्गिनीं प्राप्तवानित्यर्थः। तत्र प्रयुक्तः आजानशब्दः स्वभावे रूढः। अथवा – जनानां समूहः जानं 'तस्य समूहः' इत्यण् प्रत्ययः । आ समन्तात् बहिराभ्यन्तरे च जनसमूहं पावति स्नानपानाभ्यां पवित्रीकरोतीत्याजानपावनं क्षीरं यस्यास्तां **आजानपावनक्षीरां,** तत्रोपयुक्तक्षीरशब्दः जलार्थद्योतकः **'क्षीरं स्यान्नीरदुग्धयोः'** इति रत्नमालावचनात् । **वृषानन्दविधायिनीम्** – वृषैर्यमनियमादिभिर्धर्मैः य आनन्दं विदधातीति वृषानन्दविधिनीम् । तीर्थविशेषस्नाननियमादि- कर्मणां निःश्रेयसहेतुत्वेन शास्त्रप्रसिद्धेर्बाह्यानन्दकरीमित्यर्थः । यद्वा वृषाणामानन्दमुल्लासं विदधातीति, अर्थात् धर्मादिभिर्वृद्धिकरीमित्यर्थः । समस्तधर्मनिर्वहनद्वारा निरतिशयानन्दसंधायिनीमित्यर्थः। **'वृषः स्याद्वासवे धर्मे सौरभेये च शुक्लजे। पुंराशिभेदयोः शृङ्ग्यां मूषिकश्रेष्ठयोरपि।।**[5]**'** (इति विश्वः), **'सुकृते वृषभे वृषः'** इति अमरकोषे निगदितत्वाच्च । **श्रुतिप्रणयिनीम्** – श्रुतिपरिचिताम् उत वेदप्रतिपाद्यमिति वा , अर्थात् '**सितासिते सरिते यत्र संगते**' इत्यादि श्रुतिप्रसिद्धत्वादित्यर्थः । **'प्रणयः स्यात्परिचये यान्त्रायां सौहृदेऽपि च'**[6] इति यादवकोषेऽपि निगदितत्वात्। अथवा तरङ्गसंगतघुमघुमध्वनिभिः श्रोत्रानन्दकरीमित्यप्यर्थः स्फुरति। यतो हि – **'श्रुतिः श्रोत्रे तत्राम्नाये वार्तायां श्रोत्रकर्मणि'** इति विश्वाख्यकोषे प्रतिपाद्यमानत्वात्। **आपगाम्** – अपां समूहः आपम् समूहार्थेऽण् प्रत्ययः । तेनगच्छतीत्यापगा (अन्येष्वपि दृश्ते इत्यनेन डप्रत्ययः) तथाभूतां तां भागीरथीं, लक्षणया तत्कूलं गामिव प्राप्तवान् रामचन्द्रः इति पद्यार्थः। परन्तु अत्र गामिव इति उपमाप्रयोगात् पद्ये यानि विशेषणपदानि संप्रयुक्तानि वर्तन्ते, तानि सर्वाणि धेनुविषयेऽपि समन्वेति। तद्यथा – **आजानपावनक्षीरां** – आजन्मशुद्धं दुग्धं यस्यास्तामत्यर्थः । **वृषानन्दविधायिनीम्** –

वृषभस्यानन्दं विदधाति रतिप्रदत्वादित्यर्थः । **श्रुतिप्रणयिनीम्** – श्रुतिसखीं तत्कलपामित्यर्थः । '**चत्वारि वाक्परिमितापदानि**' इति श्रुत्या वेदवाचो धेनुत्वेन निरूपितत्वादिति धेनुशब्देऽपि विशेषणपदानां सामञ्जस्यत्वं दरीदृश्यते, इत्यत्र पद्ये श्लेषोपमानयोः संसृष्टिः विद्यत इति।

ततः मन्दाकिन्युपाख्यानं श्रोतुकामाय रामचन्द्राय कुशिकनन्दनः इत्थमभाषत – पुरा मेरुपर्वतस्य मनोरमेत्यभिधया एका कन्या आसीत्, धराभृतां चक्रवर्ती पर्वतसार्वभौमो हिमवान् तया सह सञ्जातपरिणयोत्सवेन गृहमेधी आसीत् । ततः मनोरमाजानेर्हिमवतोः द्वे कन्ये समुत्पन्ने आस्तां । तयोः कन्यकयोर्मध्य एका आद्या कन्या मन्दाकिनीति नाम्ना प्रसिद्धाभूत्, अन्या द्वितीया कन्या साक्षाद्भगवती चन्द्रचूडकुटुम्बिनी आसीत् । ततः विबुधाः तां मन्दाकिनीं याञ्चापूर्वकं हिमवन्नियोगात् प्राप्य नाकलोकं अनीनयत्, ततः प्रभृति सा सुरलोकतरङ्गिणी तत्रैव निवसमाना आसीत् ।

**<u>वियद्गङ्गावतरणवृत्तान्तः</u>** –

पुरा अयोध्याख्यपुरं सवितृवंशोद्भवेन सगरेति नाम्ना राज्ञा परिपालितमासीत् । तेन केशिनीसुमतीभ्यां सह परिसमापितविवाहेन प्रथमाश्रमो लङ्घितः । ततः पुत्रानात्मनः इच्छन् सः सगरः सपत्नीकः हिमालयपर्वतं सम्प्राप्य तपस्तेपे । ततः हिमवत अनुग्रहात् केशिनी ज्येष्ठपत्नी असमञ्जमिति नाम्ना सुतमेकं लेभे, यवीयसी सुमतिश्च षष्टिसहस्रसंख्याकान् पुत्रान् प्रापयामास । ततः सः सगरः अश्वमेधाख्यं यागविशेषं कर्तुमेकदा प्रारेभे , तदा यागाङ्गत्वेन समुदितमश्वमोचनं कृतवान्, सोऽयमश्वमेधीयाश्वः राक्षसवेषधारिणा इन्द्रेण स्वपदभ्रंशभात् अहारि। ततः अश्वमेधीयाश्वहरणज्ञानानन्तरं सौमतेयाः पुमांसः षष्ठिसहस्रसंख्याकाः सगरपुत्राः अपहृतं तं यज्ञीयाश्वमन्वेष्टुं प्रतस्थिरे । ततः यज्ञीयाश्वमन्विष्यन्तः सगरपुत्राः नखैरेव पातालपर्यन्तं भुवं चख्नुः, इन्द्रोऽश्वमपहृत्य कपिलमुनेराश्रमसमीपे निबद्धवान् । सगरपुत्रास्तत्राश्वं दृष्ट्वा कपिलेनैवाश्वोऽपहृत इति मत्वा तमवमानयन्तः कपिलकोपाग्नौ भस्मतां गताः, अथ षष्टिसहस्रपुत्रमरणानन्तरं असमञ्जस्य पुत्रम् अंशुमान्तं यागीयाश्वं समानीय सप्ततन्तुं समापयत्विति सगरोऽब्रवीत्, अंशुमानपि पातालाभ्यन्तरं गत्वा तत्र बिले कपिलक्रोधाग्निना भस्मीकृतान् पितृन् दृष्ट्वा बाष्पाकुलाक्षस्सन् तेभ्यः पितृभ्यः तर्पणाढ्जलिं दित्सुः जलान्वेषणाय पर्यटन् तुरङ्गमं लेभे, तदा तेषां सुमतिपुत्राणां मातुलः गरुडः अंशुमन्तम् अनेन प्रकारेण इत्थमब्रवीत् – 'आयुष्मन्, इह पातले गङ्गामानय, एषा गङ्गा भस्मीकृतानां समेषां सुमतिपुत्राणां सर्वोत्तमस्तरणोपायः' इति, तदनन्तरं पुत्राणां विनाशवार्तां श्रुत्वा अंशुमतानीतागीयाश्वं लब्ध्वा प्रारब्धं यज्ञं परिसामाप्य

षष्टिसहस्रपुत्रमरणजनितशोकाद्दिवं गतः, तदनन्तरं सगरपौत्र अंशुमान् राज्यं चिरकालं परिपाल्य दिलीपे न्यस्तभूभारः हिमालयनाम्ना प्रसिद्धे पर्वते गङ्गायाः भूलोकावतरणा तपस्तेपे, ततः कालगमने दीलपोऽपि स्वीय पुत्राय भगीरथाय कपिलकोपाग्निना स्वपूर्वजानां दहनं तेषामुद्धारनार्थं मातुलोपदिष्टं गङ्गावतरणवृत्तान्तादिकं सन्निगदितवान्, ततः प्रभृति भगीरथः अमर्त्यसरितं मर्त्यतरङ्गिणीं कर्तुं समुद्यतो बभूव, सद्यैव गङ्गादेवीमुद्दिश्य तपश्चचार भगीरथः, तस्य तीव्रतपःप्रभावेन समाविर्भूता देवगा गङ्गा भूलोकागमनाय अङ्गीचकार, तदा तां वोढुं पार्वतीकान्तेन शिवेनैव शक्य इति तया संप्रोक्ता, तदर्थं गोकर्णाभिधं सिद्धक्षेत्रमासाद्य भगीरथः देवापगां वोढुं शिवमुद्दिश्य तपस्तेपे, स्वात्युग्रतपोऽनुष्ठानेन समानन्दितः परमेश्वरः तां विबुधसरितं वोढुम् अन्वमंस्त। इदानीं सा सुरलेकतरङ्गिणी भूलोकं प्रति कथमागच्छतीति कवि इत्थं वर्णति –

**अथ वीचीचयच्छन्नदिगन्तगगनान्तरा।**
**शशाङ्कशङ्खसंभिन्नतारामौक्तिकदन्तुरा॥**[7]
**तरङ्गाकृष्टमार्तण्डतुरङ्गायासितारुणा।**
**फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा॥**[8]
**आविः शाखाशिखोन्नेयनन्दनद्रुमकर्षणा।**
**एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा॥**[9]
**आवर्तगर्तसंभ्रान्तविमानप्लवविप्लवा।**
**नीलजीमूतशैवालकृतरेखा हरित्तटा॥**[10]
**अवलेपभराक्रान्ता सुरलोकतरङ्गिणी।**
**पपात पार्वतीकान्तजटाकान्तारगह्वरे॥**[11]

**पद्यानामयमर्थः** –

**वीचीचयच्छन्नदिगन्तगगनान्तरा** – वीचीचयैः तरङ्गपरम्पराभिः छन्नं दिगन्तः नभोमध्यञ्च यस्याः सा वीचीचयच्छन्नदिगन्तगगनान्तरा इति। **शशाङ्कशङ्खसंभिन्नतारामौक्तिकदन्तुरा** – शशाङ्क एव शङ्खः, तेन संभिन्नानि (संगतानि) तारा एव मुक्तामणयः तैः दन्तुरा इति। स्वर्गादापतन्त्या गङ्गया तरङ्गमालया दिगन्तो नभोमध्यञ्च व्याप्तमभवत्, तदानीं चन्द्ररूपशङ्खेन सङ्गैस्ताराारूपमुक्तामणिभिर्गङ्गाऽपि व्याप्ताऽजायत इत्यर्थः।

**तरङ्गाकृष्टमार्तण्डतुरङ्गायासितारुणा** – तरङ्गै आकृष्टाः स्वमार्गादपसार्यान्यत्र प्रवर्तिताः ये मार्तण्डतुरङ्गाः, तैः आसितः स्वमार्गप्रवर्तनेन परिश्रान्तः अरुणः यया सा

तरङ्गाकृष्टमार्तण्डतुरङ्गा- यासितारुणा इति । **फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा** – फेनैः आच्छादितः ऐरावतः तस्य अन्वेषणे उद्विग्नः इन्द्रः यया सा फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा इति । फेनैः सर्वेषां जन्तूनां धवलीकृतत्वादैरावतस्य धवलत्वेन विविच्य ग्रहणेऽशक्ततयेन्द्रो व्यग्रतां प्रापित इति भावः ।

**आविः शाखाशिखोन्नेयनन्दनद्रुमकर्षणा** – आविः प्रत्यक्षाः याः शाखाग्रभागास्ताभिरुन्नेयं पारिजातादिनन्दनोद्यानतरूणां कर्षणं यस्याः सा इति विग्रहः, गङ्गाप्रवाहे पारिजातादयो नन्दनवृक्षा अवहन्, जलनिमग्नानां तेषां शाखाशिखा एवोपरिदृश्यमाना गङ्गाप्रवाहेण तत्तरूणां वाह्यमानत्वमभिव्यञ्जन्तीत्यर्थः। **एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा** – एकोदकं केवलजलाप्लुतं यन्नभः तस्मिन् मार्गे दिशाज्ञानहीनः सूर्यः यया सा इति, सम्पूर्णस्य नभसो जलमयत्वात्सूर्यः स्वमार्गनिर्धारणे व्यामोहं गत इति भावः ।

**आवर्तगर्तसंभ्रान्तविमानप्लवविप्लवा** – आवर्ताः अम्भसां भ्रमाः त एव गर्ताः विवराणि तेषु संभ्रान्ताः विमानाः तेषां मज्जनोन्मज्जनं च यस्याः सा आवर्तगर्तसंभ्रान्तविमानप्लवविप्लवा इति । गङ्गायाः गर्ताकारवर्तेषु विमानाः मज्जन्ति उन्मज्जन्ति चेत्यर्थः । **नीलजीमूतशैवालकृतरेखा हरित्तटा** – नीलजीमूताः श्याममेघाः एव शैवालानि तैः विरचिततटावबोधकसीमाचिह्नाः दिशः एव तटाः यस्याः सा **नीलजीमूतशैवालकृतरेखा हरित्तटा** इति । दिश एव गङ्गायाः तटाः सन्ति, यत्र श्यामलमेघरूपतटपरिसरचारिशैवालानि तटावबोधकसीमारेखा इव विरचयन्तीत्यर्थः ।

**'को वा मदीयं वेगं सोढुं समर्थः'** इतिरूपो गर्वः, तस्य भरेण आक्रान्ता सुरलोकतरङ्गिणी पार्वतीकान्तस्य जटाकान्तारे महाकुहरस्य मध्यप्रदेशे अवततार, तदानीं शिवः तस्याः अवलेपं दूरोत्सारितुमित्थम् समाचरितवान् –

**अलब्धनिर्गमा शम्भोः कपर्दादमरापगा ।**
**दधौ दूर्वाशिखालग्नतुषारकणिकोपमाम् ।।**[12]

अमरापगा शम्भोः जटाजूटात् बहिर्गन्तुमसमर्था आसीत्, तदा शिखायामग्रभागे संसक्ता हिमबिन्दुस्तस्याः सादृश्यं धृतवती, स्वगर्वं चूर्णयितुं शम्भुनेत्थं समाचरितमित्यर्थः। एतेन हरजटाजूटस्य विशालत्वं, तदपेक्षया गङ्गायाः समधिकाल्पत्वञ्च ध्वनितम् । ततः –

**अदृष्ट्वा तां नदीं तत्र तुष्टाव परमेश्वरम् ।**
**भगीरथो विधेः क्रौर्यात्परिक्षीणमनोरथः ।।**[13]

तत्र भगीरथः हरजटाजूटे तां सुरसरितम् अदृष्ट्वा दैवस्य प्रातिकूल्यात् प्रणष्ट-गङ्गानयनरूपमनोरथस्सन् परमेश्वरं गङ्गायाः बहिर्निर्गमनार्थं स्तुतवान् । तेन सन्तुष्टः शम्भुः तामित्थं विमुक्तवान् –

**गङ्गा सप्ताकतिर्जाता न्यपतद्धरमूर्धनि ।**
**तेन स्तुत्या प्रसन्नेन क्षिप्ता बिन्दुसरस्यपि ।।**[14]

गङ्गा एकधाराभावेन पतिष्न्त्या मम वेगं हिमवान् न सहेत इति मत्वा स्वां धारां सप्तभिर्विभागैर्विभज्य सप्तस्रोतस्वती जातेत्यर्थः, धरमूर्धनि – धरतीति धरः पर्वतः हिमालयः अस्य शिखरे पपात। भगीरथकृतस्तोत्रेण प्रसन्नेन हरेण सा गङ्गा बिन्दुसरो नामके कासारविशेषेऽपि भगीरथसौकर्याय निक्षिप्ता इत्यर्थः । ततः तस्याः चलनमित्थमुपवर्णितम् –

**तासु प्राचीं गतास्तिस्रः तिस्रः प्राचेतसीं दिशम् ।**
**अन्या पितृक्रियोद्युक्तभगीरथपथानुगा ।।**[15]

तासु गङ्गायाः सप्तसु धारासु तिस्रः धाराः पूर्वदिशं, तिस्रः धाराः पश्चिमदिशं गताः, अवशिष्टा एका धारा पितृक्रियायां स्वपूर्वजोद्धारे उद्युक्तस्य भगीरथपथमनुचचालेत्यर्थः । ततः तस्याः जाह्नवी इति नाम कथं जातमिति इत्थं समुपवर्ण्यते –

**सैषा भागीरथी जह्नोः सत्रक्षेत्रं समावृणोत् ।**
**तां स पीत्वा ततः शान्तो जहौ श्रोत्रेण वर्त्मना ।।**[16]

सा भागीरथी जह्नुरित्याख्यस्य मुनेः यज्ञभूमिं समन्तादावृतवती, तस्माद्धेतोः सः जह्नुः गङ्गायास्तदाचरणकोपाय तां निपीय, भगीरथकृतस्तुत्या शान्तकोपः तां गङ्गां श्रोत्रेण वर्त्मना निःसारितवानित्यर्थः ।

**उपसंहारः** –

भगीरथस्य परिपूर्णमनोरथत्वमित्थं कविना सन्निगद्यते –

**तया तटिन्या जाह्नव्या प्रापयत्त्रिदिवं पितॄन् ।**
**भगीरथः पुरं प्राप परिपूर्णमनोरथः ।।**[17]

सः भगीरथः ता जाह्नव्या तटिन्या स्वपूर्वजान् कपिलकोपानलभस्मीकृतान् सुमतिपुत्रान् स्वर्गलोकनिवासिनश्चकार, ततः परिपूर्णमनोरथः सफलाभिलाषः सन् पुरीमोध्यामाजगामेत्यर्थः ।

**उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः । न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।, यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः** इत्यादि वचनानुगुणं सूर्यवंशोद्भः भगीरथः स्वपूर्वजानां पितृलोकवासप्राप्त्यर्थं, धरण्यां संभ्रमणार्थञ्च, अत्यन्तपावनभूतां विबुधैकानुभवयोग्यात्मिकां अमर्त्यतरङ्गिणीं मर्त्यापगां कर्तुं बहुवारं नैकानेकप्रकारेण तीव्रातिशयतपोऽनुष्ठानेन च ऐहिकलोकाख्यं कर्मभूमिं प्रति समानयनाञ्चकार । इत्थम् अस्माभिरपि **कर्मण्येवाधिकारस्ते मा फलेषु कदाचन** इत्यादि सूक्तिं मनसि निधाय वयं सर्वे सर्वदा जीवनप्रगतिं प्रति समुद्यमानाः भवेम।

**---------इति शम्-------**

**End notes – अन्त्यसूची**


1. **संस्कृतनिबन्धशतकम् – पद्मश्री डा .डा ,आचार्यैः लिखितम् कपिलदेव द्विवेदी . – विश्वविद्यालय प्रकाशन ,द्विवेदी महोदयैः सङ्कलितम् .डि.के वाराणसी, 2008 तमे वर्षे प्रकाशितम्, ISBN : 978-81-7124-644-1. पृष्ठसंख्या – .57**

2. **अग्निपुराणं (607 .337), संस्कृतनिबन्धशतकम् – पद्मश्री डा कपिलदेव द्विवेदी . विश्वविद्यालय ,द्विवेदी महोदयैः सङ्कलितम् .डि.के .डा ,आचार्यैः लिखितम् – प्रकाशन वाराणसी, 2008 तमे वर्षे प्रकाशितम्, , ISBN : 978-81-7124-644-1. पृष्ठसंख्या .57**

3. **काव्यप्रकाशः – मम्मटभट्टविरचितः, झळकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यव्याख्यया समन्वितः, दशरथात्मजेन**

**नारायणेन संशोधितश्च, चौकम्बा पब्लिकेषसनस् द्वारा 2012 तमे वर्षे प्रकाशितम् , पृष्ठसंख्या – 16.**

4. **चम्पूरामायणम् – श्रीभोजराजसार्वभौमराजेन विरचितम्, श्रीलक्ष्मणसूरिविरचितं युद्धकाण्डसहितश्च, श्रीरामचन्द्रबुधेन्द्रविरचितया व्याख्यया समेतम्, सप्तमं संस्करणम्, मुम्बय्यां पाण्डुरङ्ग जावाजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, 1929, पृष्ठसंख्या – 47.**

5. **चम्पूरामायणम् – श्रीभोजराजसार्वभौमराजेन विरचितम्, श्रीलक्ष्मणसूरिविरचितं युद्धकाण्डसहितश्च, श्रीरामचन्द्रबुधेन्द्रविरचितया व्याख्यया समेतम्, सप्तमं संस्करणम्, मुम्बय्यां पाण्डुरङ्ग जावाजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, 1929, पृष्ठसंख्या – 48.**

6. **चम्पूरामायणम् – श्रीभोजराजसार्वभौमराजेन विरचितम्, श्रीलक्ष्मणसूरिविरचितं युद्धकाण्डसहितश्च, श्रीरामचन्द्रबुधेन्द्रविरचितया व्याख्यया समेतम्, सप्तमं संस्करणम्, मुम्बय्यां पाण्डुरङ्ग जावाजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, 1929, पृष्ठसंख्या – 48.**

7. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 76.**

8. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 77.**

9. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 77.**

10. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 78.**

11. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 78.**

12. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 79.**

13. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 79.**

14. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 80.**

15. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 80.**

16. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 80.**

17. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 79.**

******